नारायणोक्तोपनिषद्

नं. १३८६

नं· ११०८६ ब
नारायणोत्तरोपनिषद्
४ पत्राणि
उपनिषद्

नं· ~~१८८~~ ३३८

१७५.६
५.

ना
१

वैकारणयः सर्वाणिछंदांसि सर्वाणिचभूतानि नारायणा
देवसमुत्पद्यंते नारायणात् प्रवर्तंते नारायणेप्रमीयं
ते नारायणेप्रलीयंते एतन ऋग्वेदशिरसि अथनि
त्योदेवएकोनारायणः ब्रह्माचनारायणः शिवश्चना
रायणः शक्रश्चनारायणः प्रजापतिश्चनारायणः
अष्टौवसवश्चनारायणो द्वादशादित्याश्चनाराय
णः सर्वदेवताश्चनारायणः सर्वे ऋषयश्चना
रायणः कालश्चनारायणो दिशश्चनारायणो वि

दिशश्च नारायणः प्रदिशश्च नारायणः ऊर्ध्वं च नारायणः
मूर्त्तामूर्त्तं च नारायणोन्तर्बहिश्च नारायणो नारायण एवे
दं सर्वं यद्भूतं यच्च भाव्यं अथ नित्यो निष्कलंको निरा
ख्यातो निर्विकल्पो निरंजनः शुद्धो देव एको नारा
यणो न द्वितीयोस्ति कश्चित् य एवं वेद स विष्णुरे
व भवति स विष्णुरेव भवति स विष्णुरेव भवति
रुद्रं ससारथिं हत्वा मनः प्रग्रहवान् प्रमानव

ना २

याजिपरमंपारं विष्णोर्व्यंपदमस[illegible] व्योममिति ॥ एतत्
यजुर्वेदशि[illegible]सि एतद्वै नानारायणस्योपनिषत्‌ ॥ यो ह वै
ना[illegible]रायणस्योपनिषदमधीते स सर्वेभ्यो पापेभ्यो
विमुक्तोभवति स सर्वेभ्यो घोरेभ्यो विमुक्तोभवति
स सर्वान् कामानाप्नोति स सर्वांश्च लोकानाप्
प्नोति स ब्रह्मत्वंच गत्वामृतत्वंच ग[illegible] स्यमनन्त्वं
च गच्छतीति ॐ मित्येतद्ये[illegible] ह्यस्मय ॥ २

2

तिपश्चान्नारायणायेत्युपरिष्टा । दोमित्येकाक्षरं न
म इतिद्वेअक्षरे नारायणायेतिपंचाक्षराणि एतद्वै
नारायण[illegible]स्याष्टाक्षरपदं यो ह
वै नारायणस्याष्टाक्षरपदमधीत्यानुपब्रुवं सर्वमा
युरेति विंदते प्रजापत्यं रायस्पोषं गोः पत्यं ततोमृत
त्वमश्नुते इति एतत् सामवेदशिरसि प्रत्यगानं
द ब्रह्मपुरुषं प्रणवस्वरूप मकारोकार मका
रइति तानेकधा समभवत्तदेतदोमिति यमुक्त्वामु

ना॰ च्यते योगी जन्मसंसारवंधनात् नमो नारायणाये
उ ति मंत्रोपासको वैकुंठभुवनं गमिष्यति तस्मादि
३ दं पुंडरीकाक्षं विज्ञानघनं तस्मात्तडिदाभासमा
त्रं ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदन इति स
र्वभूतस्थमेकं नारायणं कारणरूपमकारणं परं ब्र
रा ह्म ॐ एतदथर्वशिरो योधीते सः सर्वेभ्यः पापेभ्यो
विमुच्यते प्रातरधीयानो रात्रिकृतं पापं नाशयति
सायमधीयानो दिवसकृतं पापं नाशयति मध्यं
दिनमादित्याभिमुखोधीयानः पंचमहापात

कोपपातकात् प्रमुच्यते स सर्ववेदपारायणफ
लं लभते नारायणसायुज्यमाप्नोति नारायण
सायुज्यमाप्नोति इति श्री अथर्वणवेदोक्तं ना
रायणोपनिषत् संपूर्णं समाप्तम् संव
त् विक्रमादित्य १९ ३० चंद्रवासरे वैशा
ख कृष्णपक्षे लिपिकृतं मया हरिकृष्ण
नेण वल्लभ नगरवासिनः

तिवक्षा


श्री रणवीर पुस्तकालय
मंदर श्री रघुनाथ